रुणेतिशपामहेततोवरुणनोमुञ्च सुमित्रिया
नआपओषधयःसन्तुदुर्मित्रियास्तस्मैसन्तु

५१ अङ्गेऽअङ्गे निदीध्यदैन्द्रऽउदानोऽअङ्गेऽअङ्गे निधी
तः देव त्वष्टर्भूरि ते सथंसमेतु सलक्ष्मा यद्विषुरूप
म्भवाति देवत्रा यन्तमवसे सखायोनु त्वा माता
पितरो मदन्तु २० ॥ समुद्रङ्गछ ॥ समुद्रङ्गछ स्वाहा
न्तरिक्षङ्गछ स्वाहा देवथंसवितारङ्गछ स्वाहा मि
त्रावरुणौ गछ स्वाहाहोरात्रे गछ स्वाहा छन्दाथं
सि गछ स्वाहा द्यावापृथिवी गछ स्वाहा यज्ञङ्गछ स्वा ५१

तु ॥१७॥ सङ्कोसन्ते मनो मनसा सम्प्राणः प्राणेन गच्छ
ताम् ॥ रेडस्यग्निष्ट्वा श्रीणात्वापस्त्वा समरिणन्वा
तस्य त्वा ध्राज्यै पूष्णो रंह्यै ऊष्मणो व्यथिषत्प्रयु
तन्द्वेषः ॥१८॥ घृतं घृतपावानः ॥ घृतङ्घृतपावानः
पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविर
सि स्वाहा ॥ दिशः प्रदिश आदिशो विदिश उद्दि
शो दिग्भ्यः स्वाहा ॥१९॥ ऐन्द्रः प्राणः ॥ ऐन्द्रः प्राणो

५० पृत्यस्वधितेमैनंहिंसीः॥१५॥रक्षसांभागः
रक्षसांभागोसिनिरस्तंरक्षोधमन्तमोनयामि॥घृते
नद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानाम
ग्निराज्यस्यवेतुस्वाहास्वाहाकृतेऽऊर्ध्वनभसम्मा
रुतङ्गच्छतम्॥१६॥इदमापःइदमापःप्रवहतावद्य
ञ्चमलञ्चयत्॥यच्चाभिदुद्रोहानृतंयच्चशेपेऽभी
रुणम्॥आपोमातस्मादेनसःपवमानश्चमुञ्चतु ५०
मीदमहंरक्षोवबाधःइदमहंरक्षो २
ऽइदमहंरक्षोभितिष्ठा

न्त्यास्म॥१३॥ वाचन्ते वा चन्ते शुन्धामि प्राणन्ते शुन्धा
मि चक्षुस्ते शुन्धामि श्रोत्रन्ते शुन्धामि नाभिन्ते शुन्धा
मि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि चरित्रांस्ते शुन्धा
मि॥१४॥ मनस्ते॥ मनस्तऽआप्यायतां वाक्तऽआप्या
त यतां प्राणस्तऽआप्यायतां चक्षुस्तऽआप्यायतां श्रो
त्रन्तऽआप्यायताम्॥ यत्ते क्रूरं यदास्थितन्तत्तऽआप्या
यतान्निष्ट्यायतान्तत्ते शुध्यतु शमहोभ्यः॥ ओषधेत्रा

४९ न्धाः श्चाविश॥ ऊरोरन्तरिक्षात्सजूर्देवेन वातेना
स्यहविषस्त्मनायजसमस्यतन्वाभव॥ वर्षोवर्षी
यसियज्ञेयज्ञपतिन्धाःस्वाहादेवेभ्योदेवेभ्यः
स्वाहा॥११॥ माहिः॥ माहिर्भूर्मापृदाकुर्नमस्त
आतानानर्वाप्रेहि॥ घृतस्यकुल्याः ऊपऋतस्यप
थ्याः अनु॥१२॥ देवीरापः देवीरापः शुद्धावोढ्वंसु
परिविष्टादेवेषुसुपरिविष्टावयंपरिवेष्टारो ४९

नजिघ्र॥ अङ्गिरस्त्वौषधीभ्यो नुत्वा माता मन्यता
ऽमनु पितानु भ्राता सगर्भ्यो नु सखा सयूथ्यः॥
अग्नीषोमाभ्यान्त्वा जुष्टम्प्रोक्षामि॥ ५॥ अपा
म्पेरुः॥ अपाम्पेरुरस्यापो देवीः स्वदन्तु स्वात्तञ्चि
त्सद्देवहविः॥ सन्ते प्राणो वातेन गच्छताथं समङ्गा
नि यजत्रैः॥ संय्यज्ञपतिराशिषा॥ ६॥ घृतेनाक्तौ॥
घृतेनाक्तौ पशुंस्त्रायेथाथं रेवति यजमाने प्रिय

४८ पृथिव्यांल्लोकः आरण्यस्तेपशुः ६ उपावीरसि
उपावीरस्युपदेवान्दैवीर्विशः प्रागुरुशिजोवह्नि
तमान् देवत्वष्टर्वसुंम्हहव्यातेस्वदन्ताम् ७ रेव
तीरमध्वम् रेवतीरमध्वंबृहस्पतेधारयावसूनि
ऋतस्यत्वादेवहविःपाशेनप्रतिमुञ्चामिधर्षामानु
षः ८ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्या
म्पूष्णोहस्ताभ्याम् अग्नीषोमाभ्याञ्जुष्टन्नियु ४८

ब्रह्मदृᳪंह क्षत्रन्दृᳪंहायुर्दृᳪंह
प्रजान्दृᳪंह ३ विष्णोः कर्म्माणि विष्णोः कर्म्माणि
पश्यत यतो व्रुता निपस्पशे इन्द्रस्ययुज्यः स
खा ४ तद्विष्णोः तद्विष्णोः परमम्पदᳪं सदाप
श्यन्ति सूरयः दिवीव चक्षुराततम् । परिवीरसि
परिवीरसिपरित्वादैवीर्विशो व्ययन्ताम्परीमं यज
मानᳪं रायो मानुष्याणाम् । दिवः सूनुरस्येषते

वस्त्वा सविता मध्वा नक्तु सुपिप्पलाभ्यस्त्वौषधी
४२ भ्यः द्यामग्रेणास्पृक्ष आन्तरिक्षम्मध्येनाप्राः
पृथिवीमुपरेण दृंहीः ॥२॥ याते धामान्यु
श्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः
अत्राह तदुरुगायस्य विष्णोः परमम्पदमवभारि
भूरि ब्रह्मवनित्वा क्षत्रवनि त्वा दात्रव
नि रायस्पोषवनि पर्यूहामि ४२

याम्य ऋमोप्याय:॥ देवस्यत्वा देवस्यंत्वासवि
तु: प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् आ
ददेनार्य्यसीदमहंरक्षसांग्रीवा ऽअपिकृन्तामि॥
यवोसिजवयास्मद्द्वेषोयवयारातीर्दिवेत्वान्तरिक्षा
यत्वापृथिव्यैत्वाशुन्धन्तांल्लोका: पितृषदना: पि
तृषदनमसि॥ अग्नेणीरसि॥ अग्ग्रेणीरसिस्वावे
शाऽऊन्नेतृणामेतस्यवित्तादधित्वास्थास्यतिदे

४६ स्पतेदेवयज्यायै देवास्त्वादेवयज्यायैजुषं
न्तां विष्वेत्वा॥ ॐ घघेत्वायस्वस्वधितेमैनथंहि
थंसीः॥ ४२ घाम्नाघाम्नालेखवीरन्तरिक्षम्माहि
थंसीः पृथिव्यासम्भव स्वयथंहित्वास्वधितिस्ते
तिजानः प्रणिनायमहतेसौभगाय॥ अतस्त्व
न्देवघनस्पतेशतवल्शोविरोहसहस्रवल्शा
विवयथंरुहेम ४३ इतिवाजसनेयसंहिता ४६

षा सा त्वयि यो मम तनूस्त्वय्यन्न दियं धं सामयि ॥
यथा यथन्नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षाप
तिरमंस्तानु तपँस्तपस्पतिः ॥ ४० ॥ उरु विष्णो ॥ उरु वि प २
ष्णो विक्रमस्वोरु क्षयाय नस्कृधि ॥ घृतं घृतयोने
पिब प्रप्र यज्ञपतिन्तिर स्वाहा ॥ ४१ ॥ अत्यन्यान
अगान्नान्याँ २ ॥ अगान्नान्याँ २ ॥ उपागामर्वाक्त्वा
परेभ्योऽविदन्परोऽवरेभ्यः ॥ तन्त्वा जुषामहे देव वन

४५ उरू विष्णो विक्रमस्वोरु क्षयाय नस्कृधि घृत
ङ्घृतयोने पिब प्रप्र यज्ञपतिन्तिर स्वाहा ३८ दे
वसवितः॥ देवसवितरेष ते सोमस्तꣳरक्षस्व
मा त्वा दभन्॥ एतत्त्वन्देव सोमदेवो देवाँ२॥ उ
पागाऽ इदमहम्मनुष्याँत्सह रायस्पोषेण स्वाहा
निर्वरुणस्य पाशान्मुच्ये ३९॥ अग्ने व्रतपाः
अग्ने व्रतपास्त्वे व्रतपा या तव तनूर्मय्यभूदे ४५

नृचक्षंस्वाहा। जुषाणोअप्तुराज्यस्यवेतुस्वाहा। ३५
अग्नेनय। अग्नेनयसुपथारायेऽअस्मान्विश्वा
निदेववयुनानिविद्वान्। युयोध्यस्मज्जुहुराणमेनो ए
भूयिष्ठान्तेनमऽउक्तिंविधेम। ३६ अयन्नः
अयन्नोऽअग्निर्वरिवस्कृणोत्वयम्मृधःपुर
एतुप्रभिन्दन्। अयंवाजाञ्जयतुवाजसाताव
यंशत्रूञ्जयतुजर्हृषाणःस्वाहा। ३७ उरुविष्णो

४४ मह्यपतेऽनुमतिरस्त्वस्तिमेस्मिँपथिदेवयानेभूया
न्मित्रस्यमा ३३ मित्रस्यमाचक्षुषेक्षध्वमग्नयः
सगराःसगरास्थसगरेणनाम्नारौद्रेणानीकेन
पातमाग्नयःपिपृतमाग्नयोगोपायतमानमोवो
स्तुमामाहिंसिष्ट ३४ ज्योतिरसिज्योतिरसि
विश्वरूपंविश्वेषान्देवानांसमित्त्वंसो
मतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यउरुयन्तासिव ४४

विश्ववेदाऽउशिगसि ३१ उशिगसिकविरङ्घा
रिरसिबम्भारिरवस्यूरसिदुवस्वाञ्छुन्ध्यूरसिमा
र्जालीयः सम्राडसिकृशानुःपारिषद्योसिपवमा
नोनभोसिप्रतक्वामृष्टोसिहव्यसूदनऽऋत
धामासिस्वर्ज्योतिःसमुद्रोसि ३२ समुद्रोसिवि
श्वव्यचाऽअजोस्येकपादहिरसिबुध्न्योवागस्यै
न्द्रमसिसदोस्यृतस्यद्वारौमामासन्ताप्तमध्वना

४३ यतने प्रजया पशुभिर्भूयात॥ घृतेन द्यावापृथि
वीपूर्य्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥२८
परि त्वा परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः॥२९॥ इन्द्रस्य
स्यूः॥ इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोसि॥ ऐन्द्रमसि वैश्व
देवमसि॥३०॥ विभूरसि॥ विभूरसि प्रवाहणो वह्नि
रसि हव्यवाहनः श्वात्रोसि प्रचेतास्तुथोसि ४३

तार्द्दिवेत्वान्तरिक्षायत्वापृथिव्यैत्वाशुंधन्तांल्लो

काःपितृषदनाःपितृषदनमसि २६ उद्दिवम्उ

द्दिवंस्त्भानान्तरिक्षम्पृणद्दृंहस्वपृथिव्यान्द्यु

तानस्त्वामारुतोमिनोतुमित्रावरुणौध्रुवेणधर्म्म

णा ब्रह्मवनित्वाक्षत्रवनिरायस्पोषवनिपर्यू

हामि ब्रह्मद्दृंहक्षत्रन्दृंहायुर्दृंहप्रजान्दृं

ह २७ ध्रुवासि ध्रुवोयंयजमानोस्मिन्ना

४२ हनोवनयामिवैष्णवीन्द्रोहणोवोवलगहनो
वस्त्तणामिवैष्णवीन्द्रोहणोवौंवलगहना३३
पदघामिवैष्णवीरद्रोहणोवौंवलगहनोपर्यूहा
मिवैष्णवावैष्णवमसिवैष्णवास्य २५ देवस्यत्वा
देवस्यत्वासवितुःप्रसवे श्विनोर्बाहुभ्याम्पूष्णोह
स्ताभ्याम॥ आददेनार्यसीदमहधेरक्षसाऽूर्ध्वा
अपिकृन्तामि यवोसियवयास्मद्द्वेषोयवयारा ४२

समानोयमसमानोनिचखानेदमहन्तैंवलगमु
त्किरामियम्मेसवन्धुर्य्यमसवन्धुर्न्निचखानेद
महन्तैंवलगमुत्किरामियम्मेसजातोयमसजातो
निचखानोत्कृत्याङ्किरामि २३ स्वराडसि स्वराडसि
सपत्नहासत्त्रराडस्यभिमातिहाजनराडसिरक्षो
हासर्वराडस्यमित्रहा २४ रक्षोहणोवःरक्षोहणो
वोवलगहनःप्रोक्षामिवैष्णवान्रक्षोहणोवोवलग

ष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा
५१ २१ देवस्य त्वा देवस्य त्वा सवितुः प्प्रसवेऽश्विनो
र्ब्बाहुभ्यां पूष्णो हस्ताभ्याम् आददे नार्य्यसी
दमहꣳ रक्षसां ग्रीवा ऽअपि कृन्तामि बृहन्न
सि बृहद्रवा बृहतीमिन्द्राय वाचं वैष्णवीमि
दमहन्तं वलगमुत्किरामि यम्मे निष्ट्यो यममा
त्यो निचखानेदमहं तं वलगमुत्किरामि यम्मे ४२
वद २२ रक्षोहणौ वलगहनम् रक्षोहणं वलगहनौ ३

घोरुगायो विष्णवेत्वा ॥१८॥ दिवोवा दिवोवावि
ष्णऽउतवापृथिव्यामहोवाविष्णऽउरोरन्तरिक्षात्
उभाहिहस्तावसुनापृणस्वाप्रयच्छ दक्षिणादोतस
व्याद्विष्णवेत्वा ॥१९॥ प्रतत् ॥ प्रतद्विष्णुस्तवतेवीर्ये
णमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषु
विक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा २० वि
ष्णोरराटम् ॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोवि

१७ स्थानाम्पतये नमो नमः इषुमद्भ्यो धन्वायिभ्यश्च वो न
मो नमः आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम
आयछद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः २ न
मो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्य
श्च वो नमो नमः शयानेभ्यः आसीनेभ्यश्च वो नमो न
मस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः २ नमः
सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपति ।१७।

नःऽआव्याधिनीनाम्पतये नमो नमो निषङ्गिःणेऽककुभाय
स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्याना
म्पतये नमो नमो वञ्चते २० ॥ नमो वञ्चते परिवञ्चते स्ता
यूनाम्पतये नमो नमो निषङ्गिःणेऽइषुधिमते तस्कराणाम्प
तये नमो नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णताम्पतये
नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः
२१ ॥ नमःऽउष्णीषिणे ॥ नमःऽउष्णीषिणे गिरिचराय कुलु

१० येनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमः
सूतायाहन्त्यैवनानाम्पतयेनमोनमोरोहिताय ।१८। नमो
रोहितायस्थपतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवा
रिवस्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेवाणिजा
यकक्षाणाम्पतयेनमोनमउच्चैर्घोषायाक्रन्दयतेपत्ती
नाम्पतयेनमोनमःकृत्स्नायतया ।१९। नमोनमःकृत्स्नायत
याधावतेसत्वनाम्पतयेनमोनमःसहमानायनिव्याधि २०

वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वाह
वामहे ॥१॥ नमो हिरण्यबाहवे ॥ नमो हिरण्यबाहवे
सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशे
भ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते प
थीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टाना
म्पतये नमो नमो बभ्लुशाय ॥२॥ नमो बभ्लुशाय व्याधि
नेन्नानाम्पतये नमो नमो भवस्य हेत्यै जगताम्पत

१६९ अवतत्यधनुष्ट्वंसहस्राक्षशतेषुधे॥ निशीर्य्यशल्या
नांमुखाशिवोनः सुमनाभव॥१३॥ नमस्तआयुधाया नमस्तु
नातताय धृष्णवे उभाभ्यामुत ते नमो बाहुभ्यां तव ध
न्वने॥१४॥ मा नो महान्तमुत मा नोऽर्भकं मा न उक्ष
न्तमुत मा न उक्षितम्॥ मा नो वधीः पितरं मोत मातरं
मा नः प्रियास्तन्वो रुद्र रीरिषः॥१५॥ मा नस्तोके तन
ये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः॥ मा नो १६९

६५

धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्॥ याश्चतेहस्तइषवःप
राताभगवोवप॥९॥ विज्यंधनुः॥ विज्यंधनुःकपर्दिनो
विशल्योबाणवाँ२॥ उत॥ अनेशन्नस्ययाइषवआभु
रस्यनिषङ्गधिः॥१०॥ याते॥ यातेहेतिर्मीढुष्टमहस्तेबभू
वतेधनुः॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज॥११॥ प
रिते॥ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः॥ अथोया
इषुधिस्तवारे॥ अस्मन्निधेहितम्॥१२॥ अवतत्यधनुः

।६० घोरयातुधान्योधराचाः परासुव ॥ प ॥ असौयः ॥ असौ
यस्ताम्रो॥ अरुणः उतबभ्रुः सुमङ्गलः ॥ येचैनंरुद्रा
अभितोदिक्षुश्रिताः सहस्रशोवैषांहेडईमहे ॥ ई ॥ अ
सौयः ॥ असौयोवसर्प्पति नीलग्रीवोविलोहितः ॥ उतैनं
गोपाः अदृश्रन्नदृश्रन्नुदहार्यः सदृष्टोमृडयातिनः
नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे अथोये
अस्यसत्वानोहंतेभ्योकरन्नमः ॥ प्रमुञ्च ॥ धनुश्च ।६८

तेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वा
शन्तमयागिरिशन्ताभिचाकशीहि ॥२॥ यामिषुम्या
मिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरु
४८ माहिंसीःपुरुषञ्जगत ॥३॥ शिवेनवचसा ॥ शिवेनवचे
सात्वागिरिशाच्छावदामसि ॥ यथानःसर्वमिज्जगदय
क्ष्मंसुमनाऽअसत ॥४॥ अध्यवोचत ॥ अध्यवोचदधि
वक्ताप्रथमोदैव्योभिषक् ॥ अहीँश्चसर्वाञ्जम्भयन्त्स

१६ पानायव्यानायोदानायप्रतिष्ठायै चरित्राय सूर्य्यस्त्वा
भिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतया
ङ्गिरस्वद्ध्रुवे सीदतम ॥ ६४ ॥ सहस्रस्य प्रमासि सहस्र
स्य प्रमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि
साहस्रोसि सहस्राय त्वा ॥ ६५ ॥ इति वाजसनेयसंहि
तायां पंचदशोध्यायः ॥ १५ ॥ नमस्ते नमस्ते रुद्र मन्यव
उतोत इषवे नमः बाहुभ्यामुत ते नमः ॥ १ ॥ या ते या १६

दा महः सुवरणाद्यस्यात ॥ आदस्य वातो अनुवा
ति शोचिरध स्मते व्रजनं कृष्णमस्ति ॥ २ ॥ आयोष्ट्वा
आयोष्ट्वा सदने सादयाम्यवतश्छायायां समुद्र
स्य हृदये ॥ रश्मीवतीं भास्वतीमा या द्यां भास्या पृथि
वीमोर्वन्तरिक्षम् ॥ ६३ ॥ परमेष्ठी त्वा ॥ परमेष्ठी त्वा सा
दयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीं दिवं यच्छ
दिवं दृंह दिवं मा हिंसीः ॥ विश्वस्मै प्राणायापा

१६६ सीद पन्न॥ लोकम्पृण॥ लोकम्पृणच्छिद्रम्पृणायोसी
दध्रुवात्वम्॥ इन्द्राग्नीत्वाबृहस्पतिरस्मिन्योनावसी
षदन्॥ पर्ण॥ ताऽअस्य॥ ताऽअस्यसूददोहसःसोमंश्री
णन्तिपृश्नयः॥ जन्मन्देवानांविशस्त्रिष्वारोचनेदि
वः॥ ६०॥ इन्द्रं॥ विश्वाः॥ इन्द्रंविश्वाऽअवीवृधन्त्समुद्र
व्यचसङ्गिरः॥ रथीतमंरथीनांवाजानांसत्पतिम्प
तिम्॥ ६१॥ प्रोथ॥ प्रोथदश्वः॥ प्रोथदश्वोनयवसेविष्यन्स १६६

ग्नेरन्तःश्लेषोसि कल्पेतान्द्यावापृथिवी कल्पन्ता
मापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय
सव्रताः। येऽअग्नयः समनसोन्तरा द्यावापृथिवीऽइ
मे शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभि
संविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम्॥५७॥
परमेष्ठी त्वा। परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्म
तीम्। विश्वस्मै प्राणायापानाय व्यानाय विश्वञ्ज्यो
तिर्यच्छ। सूर्यस्तेधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा

१६५ तमः॥५३॥उद्बुध्यस्व॥उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापू
र्त्तेसंसृजेथामयंच॥अस्मिन्त्सधस्थेऽअध्युत्तरस्मि
न्विश्वेदेवायजमानश्चसीदत॥५४॥येनवहसि॥येनव
हसिसहस्रंयेनाग्नेसर्व्ववेदसम्॥तेनेमंयज्ञन्नोनयस्व
र्द्देवेषुगन्तवे॥५५॥अयन्ते॥अयन्तेयोनिर्ऋत्वियोयतो
जातोऽअरोचथाः॥तञ्जानन्नग्नऽआरोहाथानोवर्द्ध
यारयिम्॥५६॥तपश्च॥तपश्चतपस्यश्चशैशिरावृतूऽअग्ने।१६५

ग्नावा चोम घमसहदुर प्पुरयमग्निः सत्पतिश्चेकि

तानः पृथे पयिश्वानिहितो दविद्युतद्ध स्पदः कृ कृं

णुतां प्येपृतन्यवः ॥१॥ अयमग्निर्वीरतमो वयोधाः स

हस्त्रियोद्योततामप्रयुच्छन्विभ्राजमानः सरिरस्य

मध्य उप प्रयाहि दिव्यानि धाम ॥२॥ सम्प्रच्यवध्वमुप

सम्प्रच्यवध्वमुपसम्प्रयाताग्नेपथो देवयानान्कृणुध्व

पुनः कृण्वनापितरा युवाना न्वाताथं सीत्वयि तन्तुमे

१५ मध्यं रयिं न्दाः॥ तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नू
नमीमहे सखिभ्यः॥ ४८॥ येन ऋषयः येन ऋषयस्त
पसा सत्रमयन्निन्धाना अग्निं स्वराभरन्तः॥ तस्मि
न्नहं निदधे नाके अग्निं यमाहुर्मनवस्तीर्णबर्हि
षम्॥ ४९॥ तम्पत्नीभिः॥ तम्पत्नीभिरनु गच्छेम देवाः
पुत्रैर्भ्रातृभिरुत वा हिरण्यैः॥ नाकं गृभ्णानाः सुकृत
स्य लोके तृतीये पृष्ठे अधिरोचने दिवः॥ ५०॥ श्रावाचः॥ १६४

र्द्देवानो ऽ अर्द्धाद्भुम् सज्योतिः ॥ अग्ने विश्वेभिः सु
मना ऽ अनीकैः ॥४६॥ अग्निꣳ होतारम्म ॥ अग्निꣳ होतार
म्मन्ये दास्वन्तं वसुꣳ सूनुꣳ सहसो जातवेदसं विप्र
न्न जातवेदसम् ॥ य ऽ ऊर्द्ध्वया स्वध्वरो देवो देवाच्या कृपा ॥ घृत
स्य विभ्राष्टिमनु वष्टि शोचिषा जुह्वानस्य सर्प्पिषः ॥४७
अग्ने त्वम्म ॥ अग्ने त्वन्नो ऽ अन्तम ऽ उत त्राता शिवो भ
वा वरूथ्यः ॥ वसुरग्निर्व्वसुश्रवा ऽ अच्छा नक्षि द्युमत्त

१६३ थंसुजातासः सूरयः इषथंस्तोतृभ्यः आ भर ॥ ४२ ॥ उभे
सुश्चन्द्र ॥ उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि
उतो नः उत्पुपूर्याः उक्थेषु शवसस्पते इषथंस्तोतृभ्य
आ भर ॥ ४३ ॥ अग्ने तम् ॥ अग्ने तमद्याश्वन्न स्तोमैः
क्रतुन्न भद्रथंहृदिस्पृशम् ऋध्यामा त ओहैः ॥ ४४ ॥ अ
धा हि ॥ अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः रथीः
ऋतस्य बृहतो बभूथ ॥ ४५ ॥ एभिर्नः ॥ एभिर्नो अर्कैः १६३

३८ भद्रा। उत ॥ भद्रा। उत प्रशस्तयो भद्रम्मनः कृणुष्व
वृत्रतूर्ये ॥ येना समत्सु सासहः ॥ ३९ ॥ येना समत्सु येना स
मत्सु सासहो अव स्थिरा तनुहि भूरि शर्द्धताम् ॥ वनेमा ते। अभिष्टि
भिः ॥ ४० ॥ अग्निन्तम्म ॥ अग्निन्तम्मन्ये यो वसुरस्तँय्यं
यन्ति धेनवः ॥ अस्तमर्वन्त। आशवोस्तन्नित्यासो वाजि
नः। इषं स्तोतृभ्य। आ भर ॥ १ ॥ सो। अग्निः ॥ सो। अग्नि
र्यो वसुर्गृणे सँय्यमायन्ति धेनवः ॥ समर्वन्तो रघुद्रुवः ॥ स

१८२ राधोजनोनाम॥३४॥ अग्नेवाजस्य॥ अग्नेवाजस्य
गोमतः ईशानः सहसोयहो॥ अस्मेधेहिजातवेदोमहि
श्रवः॥३५॥ सऽइधानः॥ सऽइधानोवसुष्कविरग्निराडे
न्योगिरा॥ देवदस्मभ्यमुरुर्वणीकदीदिहि॥३६॥ क्षपोराज
न॥ क्षपोराजन्नुतत्मनागेनेवस्तोरुतोषसः॥ सतिग्म
जम्भरक्षसोदहप्रति॥३७॥ नङ्गो नः॥ नङ्गोनोऽग्निराडु
तोनङ्गारातिः॥ नगङ्गोऽअघ्नरः॥ नङ्गाउतपशस्त्रय॥ः॥ १८२

मु

बिद्गुजन्तवः शोचिष्केशम्पुरुप्प्रियाग्ग्नेहव्यायव्वो
ढवे॥१॥ एनावः॥ एनावो॥ अग्निन्नमसोर्ज्जोनपात
माहुवे॥ प्प्रियञ्चेतिष्ठमरतिथंस्वध्वरंव्विश्श्वस्यदूतम
मृतम॥२२॥ व्विश्श्वस्यदूतम॥ व्विंश्श्वस्यदूतममृतंव्वि
श्श्वस्यदूतमममृतम॥ सयोजते॥ अरुषाव्विश्श्वभोजसा
सदुद्रवत्स्वाहुतः॥२३॥ सदुद्रवत॥ सदुद्रवत्स्वाहुतः॥ स
दुद्रवत्स्वाहुतः॥ सुब्रह्मायज्ञः सुशमीवसूनान्देवथ्

१८६ त्वामग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रि
याणंवनेवने ॥ स जायसे मथ्यमानः सहो महत्त्वामहुः
स सहसस्पुत्रमङ्गिरः ॥२८॥ सखायः सम् ॥ सखायः सं वः सम्य
ञ्चमिषꣳस्तोमं चाग्नये वर्षिष्ठाय क्षितीनामूर्जो न
प्त्रे सहस्वते ॥२९॥ सꣳसम् इत् ॥ सꣳसमिद्युवसे वृषन्नग्ने
विश्वान्यर्य्यऽआ ॥ इडस्पदे समिध्यसे स नो वसून्या भ
र ॥३०॥ त्वां चित्रश्रवस्तम ॥ त्वां चित्रश्रवस्तम हवन्ते ॥ १८६

गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरु
व्यञ्चमश्रेत् २५ ॥ अयमिह । अयमिह प्रथमो धा
यि धातृभिर्होता यजिष्ठो ऽध्वरेष्वीड्यः ॥ यमप्नवा
नो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ॥ २६
जनस्य गोपाः । जनस्य गोपा ऽ अजनिष्ट जागृविरग्निः
सुदक्षः सुवितायनव्यसे ॥ घृतप्रतीको बृहता दिवि
स्पृशा द्युमद्विभाति भरतेभ्यः शुचिः २७ ॥ त्वामग्ने

१६० तः॥२२॥अनुवोयज्ञस्य॥अनु वोयज्ञस्यरजसश्चनेता
पत्नीनिर्युद्भिःसचसेशिवाभिः॥दिविमूर्द्धानन्दधि
षेस्वर्षाञ्जिह्वामग्नेचकृषेहव्यवाहम्॥२३॥अबोध्य
ग्निः॥अबोध्यग्निःसमिधाजनानाम्प्रतिधेनुमिवा
यतीमुषासम्।यह्वाऽइवप्रवयामुज्जिहानाःप्रभा
नवःसिस्रतेनाकमच्छ॥२४॥अवोचामकवये॥अ
वोचामकवयेमेध्यायवचोवन्दारुवृषभायवृष्णे।१६

तिर्विघ्रुत्प्रहेतिस्त्वेश्रो नमो ऽ अस्तु ते नो व न्तु ते नो म
डयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः
॥१९॥ अग्निर्मूर्द्धा ॥ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृ
थिव्या ऽ अयम् ॥ अपां रेतांसि जिन्वति ॥२०॥ अ
यमग्निः ॥ अयमग्निः सहस्रिणो वाजस्य शतिनस्प
तिः ॥ मूर्द्धा कवी रयीणाम् ॥२१॥ त्वामग्ने ॥ त्वामग्ने
पुष्करादध्यथर्वा निरमन्थत ॥ मूर्ध्नो विश्वस्य वाघ

१५८ मेषाञ्जंभेदध्मः॥१७॥ अयमुत्तरात्॥ अयमुत्तरात्संय्यद्व
सुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ॥ वि
श्वाची च घृताची चाप्सरसावापोहेतिर्वातः प्रहेति
स्तेभ्यो नमोऽस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः॥१८॥ अयमुपरि॥ अय
मुपर्य्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रा
मण्यौ॥ उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन्हे १५९

सहजन्या चासुरसौ यातुधाना हेती रक्षांसि प्रहेतिस्ते
भ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १६ ॥ अयं पश्चात् ॥ अ
यं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च
सेनानीग्रामण्यौ प्रम्लोचन्ती चानुम्लोचन्ती चाप्स
रसौ व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमोऽअस्तु ते
नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि त

१५८ न्तु ॥१४॥ अयम्पुरः अयम्पुरो हरिकेशः सूर्य्यरश्मिस्त
स्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ पुञ्जिक
स्थला च क्रतुस्थला चाप्सरसौ दंक्ष्णवः पशवो हेतिः
पौरुषेयो वधः प्रहेतिस्तेभ्यो नमो । अस्तु ते नोऽवन्तु ते नो
मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः
॥१५॥ अयन्दक्षिणा अयं दक्षिणा विश्वकर्म्मा तस्य
रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ मेनका च १५८

वृहती दिग्विश्वे ते देवा ऽ अधिपतयो वृहस्पतिर्हे
तीनां प्रतिधर्त्ता त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृ
थिव्यां श्रयतां वैश्वदेवाग्निमारुते ऽ उक्थे ऽ अव्य
थायै स्तभ्नीतां शाक्वररैवते सामनी प्रतिष्ठित्या
ऽ अन्तरिक्ष ऽ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया य
वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्व्वे सं
विदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादय

१५७ राडसि॥ सम्राडस्युदीचीदिग्मरुतस्ते देवा ऽ अधिपत
यः सोमो हेतीनाम्प्रतिधर्त्तैकविꣳशस्त्वा स्तोमः पृथि
व्याꣳश्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैरा
जꣳसाम प्रतिष्ठित्या ऽ अन्तरिक्ष ऽ ऋषयस्त्वा प्रथमजा
देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधि
पतिश्च ते त्वा सर्व्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके
यजमानञ्च सादयन्तु॥१३॥ अधिपत्न्यसि॥ आपत्न्यसि १५७

मानञ्च सादयन्तु ॥१॥ सम्म्राडसि सम्म्राडसि प्रतीची
दिगादित्यास्ते देवा ऽअधिपतयो वरुणो हेतीनाम्प्रति
धर्त्ता सप्तदश स्त्वा स्तोमः पृथिव्याꣳश्रयतु मरुत्वतीय
मुक्थमव्यथायै स्तभ्नातु वैरूपꣳसाम प्रतिष्ठित्या ऽअन्त
रिक्ष ऽऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा
प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना ना
कस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु ॥२॥ स्व

१५६ सर्व्वेसँविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसा
दयन्तु॥१०॥विराडसि॥विराडसिदक्षिणादिग्रुद्रास्तेदेवा
ऽअधिपतयऽइन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्तोमः प
पृथिव्याँश्रयतुप्रउगमुक्थमव्यथायैस्तभ्नातुबृह
त्सामप्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्रथमजादेवे
षुदिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपति
श्चतेत्वासर्व्वेसँविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयज १५६

ऋतेत्वाक्रमोस्याक्रमायत्वासङ्क्रमोसिसङ्क्रमायत्वोत्क्र
मोस्युत्क्रमायत्वोत्क्रान्तिरस्युत्क्रान्त्यैत्वाधिपतिनोर्जो
र्जञ्जिन्व॥९॥राज्ञ्यसि॥राज्ञ्यसिप्राचीदिग्वसवस्तेदेवाऽ
अधिपतयोग्निर्हेतीनाम्प्रतिधर्त्तात्रिवृत्त्वास्तोमःपृथि
व्यांश्रयत्वाज्यमुक्थमव्यथायैस्तभ्नातुरथन्तरंसा
मप्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्रथमजादेवेषुदिवो
मात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वा

१५४ केतेनादित्येभ्यः आदित्यास्त्वा जिन्व तन्तुना रायः दि
तन्तुना रायस्पोषेण रायस्पोषं जिन्व संसर्पेण श्रु
ताय श्रुतञ्जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेन
तनूभिस्तनूर्जिन्व वयोधसायीतेनायीतञ्जिन्वा
भिजिता तेजसा तेजो जिन्व ॥ ७ ॥ प्रतिपदसि ॥ प्रति
पदसि प्रतिपदे त्वानुपदस्यनुपदे त्वौसि त्रिवृ ते त्वा
प्रवृदसि प्रवृते त्वा विवृदसि विवृते त्वा सवृदसि स १५५
सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा त्रिवृदसि ८ ॥ त्रिवृद २

विशालन्त्व न्दस्त्वदिरस्य न्दोवृरोहए न्त्वो न्दस्तन्
न्त्वन्दोऽ स्वङ्कङ्क न्वेदः ५ रश्मिनासत्याय रश्मिना
सत्यायसत्यं जिन्व प्रतिनाधर्म्मेणाधर्म्म जिन्वा
न्विन्त्या दिवादिवञ्जिन्व सन्धिनान्तरिक्षेणान्तरि
क्षञ्जिन्व प्रतिधिना पृथिव्या पृथिवीञ्जिन्व विष्ट
म्भेन वृष्ट्या वृष्टिं जिन्व प्रवयाह्नाहर्ज्जिन्वानुया
रात्र्या रात्रीञ्जिन्वोशिजावसुभ्योवसूं जिन्व प्र

१५४ ककुप्छन्दस्त्रिककुप्छन्दः काव्यछन्दोऽअँकुपञ्छ
न्दोक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः
क्षुरो भ्रज्जश्छन्दऽआच्छच्छन्दः प्रच्छच्छन्दः ॥४॥ आच्छच्छ
न्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथ
न्तरञ्छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो
भ्रजश्छन्दः संस्तुप्छन्दोऽनुष्टुप्छन्दऽएवश्छन्दो व
रिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो १५४

यद्धं स्यामनुग्र एवदानः सपत्नान २ षोडशः स्तोमः षोडशी
स्तोमः ३ ओजो द्रविणं चतुश्चत्वारिंश स्तोमो वर्चो द्रवि
णम् ४ अग्नेः पुरीषमस्य प्सो नाम तां त्वा विश्वे अभि
गृणन्तु देवाः स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे
द्रविणायजस्व ३ एवश्छन्दः ॥ एवश्छन्दो वरिवश्छन्दः
शम्भूश्छन्दः परिभूश्छन्दः आच्छच्छन्दो मनश्छन्दो
व्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः सरिरंछन्दः

१५३ तास्तुवत भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधि
पतिरासील्लोकन्ताऽइन्द्रम् ॥ २ ॥ इति वाजसनेयि
संहितायां चतुर्दशोऽध्यायः ॥ अग्ने जातान् ॥ अग्ने
जातान्प्रणुदा नः सपत्नान्प्रत्यजातान्नुद जातवेदः
अधि नो ब्रूहि सुमना अहेडँस्तव स्याम शर्मंस्त्रिवरूथ
उद्भौ ॥ १ ॥ सहसा जातान् ॥ सहसा जातान्प्रणुदा नः सपत्नान्प्र
त्यजाताञ्जातवेदो नुदस्व ॥ अधि नो ब्रूहि सुमनस्यमानो व ।१५२

पूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतारण्याः पशवो
ऽसृज्यन्त वायुरधिपतिरासीत्सप्तविꣳशत्यास्तुवत
द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्या
यँस्त एवाधिपतय आसन्नवविꣳशत्यास्तुवत ३०
नवविꣳशत्यास्तुवत वनस्पतयोऽसृज्यन्त सोमो
ऽधिपतिरासीदेकत्रिꣳशतास्तुवत प्रजा असृज्य
न्त यवाश्चायवाश्चाधिपतय आसँस्त्रयस्त्रिꣳश

१५२ ऽअसृज्यन्त सँवत्सरोधिपतिरासीत्पञ्चदशभिरस्तु
वत क्षत्रमसृज्यतेन्द्रोधिपतिरासीत्सप्तदशभिरस्तु
वत ग्राम्याः पशवोसृज्यन्त बृहस्पतिरधिपतिरासी
न्नवदशभिरस्तुवत शूर्य्ये नवदशभिरस्तुवत शूद्रार्य्यौ
वसृज्येतामहोरात्रेऽअधिपत्नीऽआस्तामेकविंश
त्यास्तुवतैकशफाः पशवोसृज्यन्त वरुणोधिप
तिरासीत्त्रयोविंशत्यास्तुवत क्षुद्राः पशवोसृज्यन्त १५२

यन्त्तप्प्रजापतिरधिपतिरासीत्तिस्मिन्नरस्तुवतं [illegible]

म्ब्रह्मास्सृज्यत ब्रह्मणस्पतिरधिपतिरासीत्त स्मिन्नर

स्तुवत भूतान्यसृज्यन्त भूतानाम्पतिरधिपतिरासीत्त

स्मिन्नरस्तुवत सप्तऽऋषयोऽसृज्यन्त धाताधिपतिरासीन्न

वभिरस्तुवत ।२८। नवभिरस्तुवत पितरोऽसृज्यन्तादिति

रधिपत्न्यासीदेकादशभिरस्तुवत ऋतवोऽसृज्यन्ता

र्तवाऽअधिपतयऽआसँस्त्रयोदशभिरस्तुवत मासा

१५ धिपत्यान्नुतथँस्युत त्र्ययस्त्रिथँशस्तोमः सहश्च ॥ २६ ॥ सह
स्यश्च सहस्यश्च हैमन्तिकाऽऋतूऽअग्नेरन्तःश्लेषोसि कल्पे
तान्द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्न
यः पृथङ्मम ज्यैष्ठ्याय सव्रताः ॥ येऽअग्नयः समनसोन्तरा य ४
द्यावापृथिवी इमे हैमन्तिकावृतूऽअभिकल्पमानाऽइ
न्द्रमिव देवाऽअभिसंविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे
सीदतम् ॥ २७ ॥ एकयास्तुवत ॥ एकयास्तुवत प्रजाऽअधी ॥ १५ ॥

वसूनाम्भागोसिरुद्राणामाधिपत्यञ्चतुष्पात्स्पृतञ्चतुर्विंशं
शस्तोमः आदित्यानाम्भागोसिमरुतामाधिपत्यङ्गर्भास्पृताः
पञ्चविंशस्तोमोदित्यैन्भागोसिपूष्ण आधिपत्यमोजस्पृ
तन्त्रिणवस्तोमोदेवस्यसवितुर्भागोसिबृहस्पतेराधिप
त्यंसमीचीर्दिशस्पृताश्चतुष्टोमस्तोमोयवानाम्भागो
२५ यवानाम्भागोस्ययवानामाधिपत्यम्प्रजास्पृताश्चतु
श्चत्वारिंशस्तोमः ऋभूणाम्भागोसिविश्वेषान्देवानामा

१५० थंशो ब्रुध्नस्य विष्टपं चतुस्त्रिथंशो नाकः षट्त्रिथंशो वि
वर्त्तोष्टा चत्वारिथंशो धर्त्रं चतुष्टोमः ॥ २३ ॥ अग्नेर्भागः ॥
अग्नेर्भागोसि दीक्षाया आधिपत्यम्ब्रह्म स्पृतन्त्रिवृ
त्स्तोमः इन्द्रस्य भागोसि विष्णोराधिपत्यं क्षत्रथं स्पृतम्पञ्च
दशस्तोमो नृचक्षसाम्भागोसि धातुराधिपत्यञ्जनित्रथं स्पृ
तथं सप्तदशस्तोमो मित्रस्य भागोसि वरुणस्याधिपत्य
न्दिवो वृष्टिर्वात स्पृत एकविथंशस्तोमो वसूनाम्भाग ॥ २४
१५०

द्वी

वर्च्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥ २१ ॥ यन्त्री राड्ड यन्त्र्यसि
यमनी ध्रुवासि धरित्री ॥ इषे त्वोर्जे त्वा रय्यै त्वा पो
षाय त्वा लोकन्ताऽइन्द्रम् ॥ २२ ॥ आशुस्त्रिवृत् ॥ भान्तः पञ्च
दशो व्योमा सप्तदशो धरुणऽएकविंशः प्रतू
र्तिरष्टादशस्तपो नवदशोऽभीवर्तः सविंशो वर्चो द्वाविं
शः सम्भरणस्त्रयोविंशो योनिश्चतुर्विंशो गर्भाः पञ्च
विंशऽओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठा त्रयस्त्रिं

१४९ यित्री छन्दोन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्रा
णि छन्दो वाक् छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो
गौश्छन्दो जाश्छन्दोश्वश्छन्दः ॥१९॥ अग्निर्देवता ॥ अ
ग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वस
वो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वे
देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता
२० मूर्द्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरणी आयुषे त्वा १४९

वाऽअग्निसँविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥१६॥
आयुर्म्मे ॥ आयुर्म्मेपाहिप्प्राणम्मेपाह्यपानम्मेपाहिव्यान
म्मेपाहिचक्षुर्म्मेपाहिश्रोत्रम्मेपाहिवाचम्मेपिन्वमनोमे
जिन्वात्मानम्मेपाहिज्योतिर्म्मेयच्छ ॥१७॥ माछन्दः ॥ माछ
न्दः प्रमाछन्दः प्रतिमाछन्दोऽअस्रीवयश्छन्दः पङ्क्तिश्छ
न्दऽउष्णिक्छन्दोबृहतीछन्दोनुष्टुप्छन्दोविराट्छन्दोगायत्री
छन्दस्त्रिष्टुप्छन्दोजगतीछन्दः पृथिवीछन्दः ॥१८॥

१४० सव्रताः ये अग्नयः समनसोऽन्तरा द्यावापृथिवी ऽइमे ॥
वार्षिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसं
विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥१५॥ इषश्च इष
श्चोर्ज्जश्च शारदावृतू अग्नेरन्तःश्लेषोसि कल्पेतां द्या
वापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृ
थङ्मम ज्यैष्ठ्याय सव्रताः ये अग्नयः समनसोन्तरा द्यावा
पृथिवी ऽइमे शारदावृतू अभिकल्पमाना इन्द्रमिव दे १४०

सि प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दि
क् ॥१३॥ विश्वकर्म्मा त्वा ॥ विश्वकर्म्मा त्वा सादयत्वन्तरिक्षे
स्य पृष्ठे ज्योतिष्मतीम् । विश्वस्मै प्राणायापानाय व्याना
य विश्वं ज्योतिर्यच्छ । वायुष्टेधिपतिस्तया देवतयाङ्गिर
स्वद्ध्रुवा सीद ॥१४॥ नभश्च ॥ नभश्च नभस्यश्च वार्षिकावृतू
ऽ अग्नेरन्तःश्लेषोसि कल्पेतां द्यावापृथिवी कल्पन्ता
माप ऽ ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय

१४ न्दृंहतैँ सुखम्पृष्ठेन द्यावापृथिवी ऽअन्तरिक्षञ्च व्य
चसे ॥११॥ विश्वकर्म्मा त्वा ॥ विश्वकर्म्मा त्वा सादयत्वन्तरि
क्षस्य पृष्ठे व्यचस्वतीम्प्रथस्वतीमन्तरिक्षं यच्छान्तरिक्ष
न्दृंहान्तरिक्षम्मा हिंसीः ॥ विश्वस्मै प्राणायापानाय व्या
नायोदानाय प्रतिष्ठायै चरित्राय ॥ वायुष्ट्वाभिपातु मह्या
स्वस्त्या छर्द्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१२॥
राज्ञ्यसि ॥ राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक्सम्राडसि ॥ १४

तोछन्दःऽउक्षावयःककुछन्दःऋषभोवयःसतोबृह२
योविशालंछन्दःपुरुषोवयस्तन्द्रंछन्दोव्याघ्रोवयोना
धृष्टंछन्दःसिंहोवयश्छदिश्छन्दःपष्ठवाड्वयोबृह
तीछन्दोनड्वान्वयः॥पी॥अनड्वान्वयःपङ्क्तिश्छन्दोधेनु
र्वयोजगतीछन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दोदित्यवाड्वयो
विराछन्दःपञ्चाविर्वयोगायत्रीछन्दस्त्रिवत्सोवयःउष्णि
क्छन्दस्तुर्यवाड्वयोनुष्टुप्छन्दोलोकंताइन्द्रम॥१॥इन्द्रा
ग्नीऽअव्यथमानाम्॥इन्द्राग्नीऽअव्यथमानामिष्टका

१४६ वैवैयो नाधैरग्नये त्वा वैश्वानराय। ऋचि नाध्रुवां सादयता
मिह त्वा ॥७॥ प्प्राणम्मे ॥ प्प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे
पाहि चक्षुर्म्मऽउर्व्या विभाहि श्रोत्रम्मे श्लोकय ॥ अपः पिन्वौ
षधीर्ज्जिन्व द्विपादव चतुष्पात्पाहि दिवो वृष्टिमेरय ॥८॥ मू
र्द्धा वयः ॥ मूर्द्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मय
न्दं छन्दो विष्टम्भो वयोऽधिपतिश्छन्दो विश्वकर्म्मा व
यः परमेष्ठी छन्दो वस्तो वयो विवलं छन्दो वृष्णिर्वै १४६

शिवनाध्वर्य्यू सादयतामिहत्वा सजूऽ ऋतुभिः सजूर्विधाभिः
२ सजू सजूर्वसुभिः सजूर्द्देवैर्वैयोनाधैरग्नयेत्वा वैश्वानराया शिवना
ध्वर्य्यू सादयतामिहत्वा सजूऽ ऋतुभिः सजूर्विधाभिः सजूरु
द्रैः सजूर्द्देवैर्वैयोनाधैरग्नयेत्वा वैश्वानराया शिवनाध्वर्य्यू सा
दयतामिहत्वा सजूऽ ऋतुभिः सजूर्विधाभिः सजूरादित्यैः स
जूर्द्देवैर्वैयोनाधैरग्नयेत्वा वैश्वानराया शिवनाध्वर्य्यू सादयता
मिहत्वा सजूऽ ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्द्देवैः सजूर्द्दे

१४५ तामिहत्वा॥५ शुक्रश्च॥ शुक्रश्च शुचिश्च ग्रैष्मावृतू ऽ अग्ने
रन्तः श्लेषोसि कल्पेतान्द्यावापृथिवी कल्पन्तामाप ऽ ओषध
यः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ये ऽ अग्न
यः समनसोन्तरा द्यावापृथिवी ऽ इमे ग्रैष्मावृतू ऽ अभिक
ल्पमाना ऽ इन्द्रमिव देवा ऽ अभिसंविशन्तु तया देवतयाङ्गिर
स्वद्ध्रुवे सीदतम्॥६ सजूः ऽ ऋतुभिः सजूः ऽ ऋतुभिः सजूर्विधा
भिः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानराय १४५

शुशेवास्त्ववेशा तन्वासँविशस्वाश्विनाध्वर्यूँसादयतामि
हत्वा ३ ॥ पृथिव्याः पुरीषम ॥ पृथिव्याः पुरीषमस्यप्सो नामता
न्त्वविश्वेऽअभिगृणन्तुदेवाः स्तोमपृष्ठाघृतवतीहसी
दप्रजावदस्मेद्रविणायजस्वाश्विनाध्वर्यूसादयतामिह
त्वा ४ ॥ आदित्यास्त्वा ॥ अदित्यास्त्वापृष्ठेसादयाम्यन्तरि
क्षस्यधर्त्रीँविष्टम्भनीन्दिशामधिपत्नीम्भुवनानाम् ऊ
र्म्मिर्द्रप्सोऽअपामसिविश्वकर्म्मातऽऋषिरश्विनाध्वर्यूसादय

१५५ ध्रुवक्षितिर्ध्रुवयोनिः॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवंयो
निमासीदसाधुया॥ उख्यस्यकेतुम्प्रथमञ्जुषाणाश्वि
नाध्वर्यूसादयतामिहत्वा॥१॥ कुलायिनीघृतवती॥ कुला
यिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृथिव्याःअभि
त्वारुद्रावसवोगृणन्त्विमाब्रह्मपीपिहिसौभगायाश्वि
नाध्वर्यूसादयतामिहत्वा२ स्वेदक्षेः॥ स्वेदक्षेदक्षपितेह १४४
सीददेवानांसुम्नेबृहतेरणाय॥ पितेवैधिसूनवआ

त्त्रंऽऋषिः प्प्रजापतिगृहीतया त्वया श्श्रोत्त्रंङ्गृह्णामि प्प्र
जाब्भ्यः ॥ ५७ ॥ इयमुपरि इयमुपरि मतिस्तस्यै वाङ्मात्या
हेमन्तो वाच्च्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवतऽआ
ग्ग्रयणऽआग्ग्रयणात्त्रिणवत्त्रयस्त्रिंशौ त्त्रिणवत्त्र
यस्त्रिंशाब्भ्यांशाक्करररैवते विश्वकर्म्मऽऋषिः प्प्रजा
पतिगृहीतया त्वया वाचङ्गृह्णामि प्प्रजाब्भ्यो ल्लोकन्ता
ऽइन्द्रम् ॥ ५८ ॥ इति वाजसनेयसंहितायां त्त्रयोदशोऽध्यायः

१४३ भ्यः॥ ५५॥ अयम्पश्चात्।। अयम्पश्चाद्विश्वव्यचास्तस्य
चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्याऽऋ
क्साममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं ज
मदग्निःऽऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि
प्रजाभ्यः॥ ५६॥ इदमुत्तरात्। इदमुत्तरात्स्वस्तस्य श्रोत्रं
सौवं शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभऽऐडमैडान्म
न्थी मन्थिनऽएकविंशऽएकविंशाद्वैराजं विश्वामि १४३

गायत्त्री वासन्ती गायत्त्र्यै गायत्त्रङ्गायत्त्रादुपाꣳशुरुपा
ꣳशोस्त्रिवृत्त्रिवृतो रथन्तरं वसिष्ठ ऋषिः प्रजापति
गृहीतया त्वया प्राणङ्गृह्णामि प्रजाभ्यः ॥५४॥ अयन्द
क्षिणा ॥ अयन्दक्षिणा विश्वकर्म्मा तस्य मनो वैश्वकर्म्म
णङ्ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारꣳस्वाराद
न्तर्य्यामो न्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाज
ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजा

१४२ न्त्वा सधिषि सादयाम्म्युपा न्त्वा सदने सादयाम्म्युपा न्त्वा
सधस्थे सादयाम्म्युपा न्त्वा योनौ सादयाम्म्युपा न्त्वा पुरी
षे सादयाम्म्युपा न्त्वा पाथसि सादयामि गायत्रेण त्वा छन्द
सा सादया[illegible]मि त्रैष्टुभेन त्वा छन्दसा सादयामि [illegible]
जागतेन त्वा छन्दसा सादयाम्म्यानुष्टुभेन त्वा छन्दसा सा
दयामि पाङ्क्तेन त्वा छन्दसा सादयामि ॥ ५३ ॥ अयम्पुरः ॥ अय
म्पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो ॥ १४२

न्रोहमायुष्मनुपमेध्यासः॥ शरन्नमारएएमनुते दिशामि
तेनचिन्त्वानस्तन्त्वोनिषीद॥ शरन्नतेमुगन्छुतुयान्दि
ष्पस्तन्ते मुगन्छुतु॥ प॥ त्वैय्यविष्णु॥ त्वैय्यविष्णु दामुषो न्द्रैः
पाहिस्त्पुधागिरः॥ रन्नातोकमुतत्मनो॥ पर॥ म्पुपान्त्वा॥ म
पान्त्वेमैंत्सादयाम्प्यपान्त्वो प्मैंत्सादयाम्प्युपान्त्वा न स्मैंत्सा
दयाम्प्यपान्त्वा ज्योतिषिसादयाम्प्युपान्त्वायने सादया
म्प्यर्णवेत्वासदने सादयाम्प्युपान्त्वा द्वयैसादयाम्प्युपा
मिसमुद्रेत्वासदने सादयामि सरिरेत्वासदने सादया

१४२ गवयन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥४९॥ इम
मूर्णायुम्। इममूर्णायुं वरुणस्य नाभिन्त्वचम्पशूनान्द्वि
पदाञ्चतुष्पदाम्। त्वष्टुः प्रजानाम्प्रथमञ्जनित्रमग्ने
मा हिंसीः परमे व्योमन्। उष्ट्रमारण्यमनु ते दिशामि ते
न चिन्वानस्तन्वो निषीद। उष्ट्रन्ते शुगृच्छतु यन्द्विष्मस्त
न्ते शुगृच्छतु ॥५०॥ अजो हि। अजो ह्यग्नेरजनिष्ट शोकात्सो
ऽअपश्यज्जनितारमग्रे। तेन देवा देवतामग्रमायँस्तेन ॥५१॥

न्ते सुगं छन्तु ॥४७॥ इमम्मा हिंᳬसीरेकशफम्पशुं कनि
क्रन्दँ वाजिनँ वाजिनेषु । गौरमारण्यमनु ते दिशामि ते
न चिन्वानस्तन्वो निषीद । गौरन्ते सुगं छन्तु यन्द्विष्मस्त
न्ते सुगं छन्तु ॥४८॥ इमᳬ साहस्रम् ॥ इमᳬ साहस्रᳬ शत
धारमुत्सं व्यच्यमानᳬ सरिरस्य मध्ये । घृतन्दुहानाम॥
दितिञ्जनायाग्ने मा ॥ माहिᳬसीः परमे व्योमन् । गवय
मारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ॥

१४० तियेनप्प्रजाविश्वकर्म्माजजानतमग्नेहेडः परितेवृ
णक्तु ॥४५॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगादनी
कञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथि
वीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्तस्थुषश्च ॥४६॥
इमम्मा ॥ इमम्माहिꣳसीर्द्विपादम्पशुꣳसहस्राक्षो
मेधायचीयमानः ॥ मयुम्पशुम्मेधमग्नेजुषस्वतेनचि
न्वानस्तन्वोनिषीद ॥ मयुन्तेशुगृच्छतुयन्द्विष्मस्त १४०

व्योमन्॥४२॥ अजस्रमिन्दुमरु॒। अजस्रमिन्दुमरुषम्भु

रण्युमग्निमीडे पूर्वचित्तिन्नमोभिः। सपर्वभिऽऋतुशः

कल्पमानो गाम्माहिᳪसीरदितिँविराजम्॥४३॥ वरूत्री

न्त्वष्टुर्वरुणस्य नाभिमविञ्जज्ञाना

ᳪरजसः परस्मात्। महीᳪसाहस्रीमसुरस्य मायाम

ग्ने माहिᳪसीः परमे व्योमन्॥४४॥ योऽअग्निः। योऽ

अग्निरग्नेरध्यजायत शोकात्पृथिव्याऽउत वा दिवस्प

१२९ च ॥ ३९ ॥ अग्निञ्ज्योतिषा ॥ अग्निञ्ज्योतिषा ज्योतिष्मान्रु
क्मो वर्च्चसा वर्च्चस्वान् ॥ सहस्रदा असि सहस्राय त्वा
॥ ४० ॥ आदित्यङ्गर्भम् ॥ आदित्यङ्गर्भम्पयसा समङ्ग्धि सहस्र
स्य प्रतिमां विश्वरूपम् ॥ परिवृङ्ग्धि हरसा माभिमंस्थाः
शतायुषङ्कृणुहि चीयमानः ॥ ४१ ॥ वातस्य जूतिम् ॥ वातस्य
जूतिं वरुणस्य नाभिमश्वञ्जज्ञानं सरिरस्य मध्ये
शिशुन्नदीनां हरिमद्रिबुध्नमग्ने मा हिंसीः परमे १२९

द्वा॥ अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः॥ अरं व
हन्ति मन्यवे॥ ३ ई॥ युक्ष्वा हि॥ युक्ष्वा हि देवहूतमाँ॥२॥ अ
श्वाँ॥२॥ अग्ने रथीरिव॥ नि होता पूर्व्यः सदः॥३॥ सम्य
क्स्त्रवन्ति सरितो न धेना॥ अन्तर्हृदा मनसा पूयमानाः॥ घृ
तस्य धारा॥ अभि चाकशीमि हिरण्ययो वेतसो मध्ये॥ अग्नेः॥
३ण ऋचे त्वा॥ ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा॥ अ
भूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य

१२० सानःसुकृतस्यलोकेतत्रगच्छतयत्रपूर्वेपरेताः॥३१॥मही
द्यौः॥मह्यद्यौःपृथिवीचनऽइमंयज्ञम्मिमिक्षताम्॥पिपृ
तान्नोभरीमभिः॥३२॥विष्णोःकर्माणिपश्यतयतोव्रता
निपस्पशे॥इन्द्रस्ययुज्यःसखा॥३३॥ध्रुवासिधरु
णेतोजज्ञेप्रथममेभ्योयोनिभ्योऽअधिजातवेदाः॥३४॥इषे
राये॥इषेरायेरमस्वसहसेद्युम्नऽऊर्जेऽअपत्याय॥सम्राड
सिस्वराडसिसारस्वतौत्वोत्सौप्रावताम्॥३५॥अग्नेयु
तवैदाःसजायुत्यात्रिष्टुभानुष्टुभावदेवेश्वोदश्वेहतुप्रजा॥ १२०

धुनक्तमन्त्र॥ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः॥
मधुद्यौरस्तुनः पिता २८ मधुमान्नः॥ मधुमान्नोवनस्प
तिर्मधुमाँ २॥ अस्तु सूर्यः॥ माध्वीर्गावोभवन्तुनः २९
अपाङ्गत्वन्न॥ अपाङ्गत्वन्त्सादमात्वासूर्य्योजितासीअ
ग्निर्वैश्वानरः॥ अच्छिन्नपत्राः प्रजा॥ अनुवीक्षस्वानुत्वा
दिव्यावृष्टिः सचताम् ३०॥ त्रीन्त्समुद्रान्॥ त्रीन्त्समुद्रान्त्स
मसृपत्स्वर्गानपाम्पतिर्वृषभइष्टकानाम्॥ पुरीषंव

137 कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्या
यसव्रताः॥ येऽअग्नयः समनसोन्तरा द्यावापृथिवीऽइमे
वासन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभि
संविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम्॥२५॥ अषाढासि
अषाढासि सहमाना सहस्वारातीः सहस्व पृतनायतः॥
सहस्रवीर्यासि सा मा जिन्व॥२६॥ मधुवाताः मधुवाताऽऋ
तायते मधु क्षरन्ति सिन्धवः॥ माध्वीर्नः सन्त्वोषधीः॥२७॥ म 137

देवाः सूर्य्येरश्चो गोष्ठुरश्चषुपारुचः इन्द्राग्नी ताभिः

सर्व्वोनीरुचन्नोधत्त वृहस्पते २४ विराड्ज्योति विरा

ड्ज्योतिरधाय त्स्वराड्ज्योतिरधारयत प्रजापतिष्ठा सादय

तु पृष्ठे पृथिव्या ज्योतिष्मतीम् विश्वस्मै प्राणायापाना

य व्यानायु विश्वं ज्योतिर्य्यच्छ अग्निष्टेधिपतिस्तया देव

तयाङ्गिरस्वद्ध्रुवासीद २५ मधुश्च माधवश्च वास

न्तिकावृतू अग्नेरन्तः श्लेषोसि कल्पेतान्द्यावापृथिवी

१३६ तयाङ्गिरस्वद्ध्रुवासीद ॥१९॥ काण्डात्काण्डात्प्ररोहन्ती ॥ से
काण्डात्काण्डे काण्डात्काण्डात्प्ररोहन्तीपरुषः परुष
स्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥२०॥ याश
तेन ॥ याशतेनप्रतनोषिसहस्रेणविरोहसि ॥ तस्या
स्तेदेवीष्टकेविधेमहविषावयम् ॥२१॥ यास्ते ॥ यास्तेऽअ
ग्नेसूर्येरुचोदिवमातन्वन्तिरश्मिभिः ॥ ताभिर्नो
ऽअद्यसर्वाभीरुचेजनायनस्कृधि ॥२२॥ यावः ॥ यावो १३६

न्दृंह॥१६॥ प्रजापतिष्ट्वा॥ प्रजपतिष्ट्वासादयत्वपांपृ
ष्ठेसमुद्रस्येमन्॥ व्यचस्वतीम्प्रथस्वतीम्प्रथस्वपृथिव्य
सि॥१७॥ भूरसि॥ भूरसिभूमिरस्यदितिरसिविश्वधाया
विश्वस्यभुवनस्यधर्त्री॥ पृथिवीयच्छपृथिवीन्दृंहपृ
थिवीम्माहिंसीः॥१८॥ विश्वस्मैप्राणाय॥ विश्वस्मैप्रा
णायापानायव्यानायोदानायप्रतिष्ठायैचरित्रायअ
ग्निष्ट्वाभिपातुमह्यास्वस्त्याछर्दिषाशन्तमेनतयादेव

१३५ त्नून॥ अग्नेष्ट्वातेजसासादयामि॥ ३ अग्निर्मूर्द्धा॥ अ
ग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम॥ अपांᳬ
रेताᳬसिजिन्वति॥ इन्द्रस्यत्वौजसासादयामि॥ ४॥ भु
वोयज्ञस्य॥ भुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिः
सचसेशिवाभिः दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्ने
चकृषेहव्यवाहम॥ १५ ध्रुवासिधरुणास्तृताविश्वकर्म्म
णा॥ मात्वासमुद्रऽउद्वधीन्मासुपर्णोऽव्यथमानापृथिवी १३५

प्रतिस्पशो विसृजतूर्णितमो भवापायुर्विशो ऽ अस्या

ऽ अदब्धः॥ यो नो दूरे ऽ अघशंसो यो ऽ अन्त्यग्ने मा

किष्टे व्यथिरादधर्षीत॥ ३॥ उदग्ने॥ उदग्ने तिष्ठ प्रत्या

तनुष्व न्यमित्राँ२ऽ ओषतात्तिग्महेते॥ यो नो ऽ अराति

ꣳसमिधान चक्रे नीचातन्धक्ष्यतसन्नशुष्कम्॥ ४॥ ऊ

र्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने॥ अ

वस्थिरातनुहि यातुजूनां जामिमजामिं प्रमृणीहि श

१३४ नमः॥७॥ येवा॥ येवामीरोचनेदिवोयेवासूर्य्यस्यरश्मि
षु॥ येषामप्सुसदस्कृतन्तेभ्यः सर्प्पेभ्योनमः॥ ण॥ कृणु
ष्वपाजः॥ कृणुष्वपाजः प्रसितिन्नपृथ्वींयाहिराजेवा
मवाँ२॥ इभेन॥ तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्य
रक्षसस्तपिष्ठैः॥ ८॥ तवभ्रमासः॥ तवभ्रमासआशु
यापतन्त्यनुस्पृशधृषताशोशुचानः॥ तपूंष्यग्नेजुह्वा
पतङ्गानसन्दितोविसृजविष्वगुल्काः॥ १०॥ प्रतिस्पशः॥ १३५

पृथिवीँ द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ४ द्र
प्सश्चस्कन्द । द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमञ्च
योनिमनु यश्च पूर्व्वः । समानँ योनिमनु सञ्चरन्तं द्र
प्सञ्जुहोम्यनु सप्त होत्राः ५ नमोऽस्तु । नमोस्तु सर्प्पे
भ्यो ये के च पृथिवीमनु येऽअन्तरिक्षे ये दिवि तेभ्यः
सर्प्पेभ्यो नमः ६ याऽइषवः । याऽइषवो यातुधानानां
ये वा वनस्पतीँ॥रनु । ये वा वटेषु शेरते तेभ्यः सर्प्पेभ्यो

१३३ चक्ता म॥१॥ अपाम्पृष्ठ न॥ अपाम्पृष्ठमसि योनिरग्नेः
समुद्रमभितः पिन्वमानम्। वर्द्धमानो महाँ २॥ आ च
पुष्करे दिवो मात्रया वरिम्णा प्रथस्व॥२॥ ब्रह्मजज्ञान
म॥ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो वे
नऽआवः स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनि
मसतश्च विवः॥३॥ हिरण्यगर्भः सम॥ हिरण्यगर्भः सम
वर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत्। स दाधार १३३

धस्मात॥ अग्ग्नेत्वाङ्कामयागिरा॥११५ तुभ्यन्ताः तुभ्य
न्ताऽअङ्गिरस्तमविश्वाः सुक्षितयःपृथक्॥ अग्ग्नेत्वौ
म्वि कामायबेमिरे॥११६॥ अग्निः प्रियेषु॥ अग्निः प्रिये
षुधामसुकामोभूतस्यभव्यस्य॥ सम्राडेकोविराजा
ति॥११७॥ इति वाजसनेयसंहितायांद्वादशोध्यायः॥
मयिगृह्णामि॥ मयिगृह्णाम्यग्ग्रेऽअग्निंरायस्पोषा
यसुप्रजास्त्वायसुवीर्याय॥ मामुदेवताःस

१३२ धं सुपथ्य स्तम न्त्वा गिरा दैव्या म्मानुषा युगा ॥११॥ आप्या
यस्व ॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् भवा वाज
स्य सङ्गथे ॥१२॥ सन्ते ॥ सन्ते पयांसि समु यन्तु वाजाः सं वृ
ष्ण्या न्यभि मातिषाहः ॥ आप्यायमानो ऽमृताय सोम दि
वि श्रवांस्युत्तमानि धिष्व ॥१३॥ आप्यायस्व ॥ आप्याय
स्व मदिन्तम सोम विश्वेभिरंशुभिः भवा नः सप्रथस्तमः
सखा वृधे ॥१४॥ आ ते ॥ आ ते वत्सो मनो यमत्परमाच्चित्स १३२

तेः। त्वे इषुः सन्दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः॥ १८ ॥
इरज्यन्नग्ने। इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो ऽ अ
मर्त्य। स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम्॥
१९ इष्कर्तारमध्वरस्य। इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्
तं राधसो महः। रातिं वामस्य सुभगां महीमिषं दधा
सि सानसिं रयिम्॥ ११॥ ऋतावानं महिषम्। ऋतावानं म
हिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः। श्रुत्कर्णं

१०३। योनिम्महिषस्य धाराम्॥ आमागोषु बिशत्वातनूषु जहामि
सेदिमनिराममीवाम॥१०५॥ अग्नेतव॥ अग्नेतवश्श्रवो
वयोमहिभ्राजन्ते। अर्च्चयो बिभावसो॥ वृहद्भानोशवसावा
जमुक्थ्यन्दधासिदाशुषेकवे॥१०६॥ पावकवर्च्चाः शुक्रवर्च्चाः
पावकवर्च्चाः शुक्रवर्च्चाः अनूनवर्च्चाः उदियर्षिभानुनापु
त्रोमातराविचरन्नुपावसिपृणक्षिरोदसी उभे॥१०७॥ ऊर्ज्जोन
पात् ऊर्ज्जोनपाज्जातवेदः सुशस्तिभिर्म्मन्दस्वधीतिभिर्हि।१०३।

कैंप्पाऽअस्मै २।५ अग्निर्दासति ॥ १।१ मा मा ॥ मा मा हिंसी
ज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्म्मा व्यानट् । य
श्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम
१।२ अभ्यावर्त्तस्व ॥ अभ्यावर्त्तस्व पृथिवि यज्ञेन पयसा
सह ॥ वपान्ते अग्निरिषितो अरोहत् ॥ १।३ अग्ने यत्ते ॥ अ
ग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् । तद्देवेभ्यो
भरामसि ॥ १।४ इषमूर्जम् ॥ इषमूर्जमहमित आदमृतस्य

१२
ङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामोषधे
सोमोराजाविद्वान्यक्ष्मादमुच्यत॥९८॥ सहस्वमे॥ सह
स्वमेऽअरातीः सहस्वपृतनायतः॥ सहस्वसर्वम्पाप्मा
नंसहमानास्योषधे॥९९॥ दीर्घायुस्ते॥ दीर्घायुस्त्वा
ऽओषधेखनितायस्मैचत्वाखनाम्यहम्॥ अथोत्वन्दी
र्घायुर्भूत्वाशतवल्शाविरोहतात्॥१००॥ त्वमुत्तमा॥ त्वमु
त्तमास्योषधेतववृक्षाऽउपस्तयः॥ उपस्तिरस्तुसोस्मा।१२

दूरम्यरागताः ॥ सर्वाः सङ्गत्य वीरुधोस्यै सन्दत्तवीर्य्यम् ९
४ ॥ मा वः ॥ मा वो रिषत्खनिता यास्मै चाहङ्खनामि वः द्वि
पाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम् ॥ ९५ ॥ ओषधयः सम्
ओषधयः समवदन्त सोमेन सहराज्ञा ॥ यस्मै कृणोति ब्राह्म
णस्तथ्ठंराजन्पारयामसि ॥ ९६ ॥ नाशयित्री बलासस्य ॥
नाशयित्री बलासस्यार्शस उपचितामसि ॥ अथो शतस्य
यक्ष्माणाम्पाकारोरसि नाशनी ॥ ९७ ॥ त्वाङ्गन्धर्वाः ॥ त्वा

१२९ पद्वीशा त्सर्वस्म्माद्देवकिल्बिषात् ॥ ९० ॥ अवपतन्तीरव
दन्॥ अवपतन्तीरवदन्दिवऽओषधयस्परि । यञ्जीवमश्न
वामहै नसरिष्यातिपूरुषः ॥ ९१ ॥ याऽओषधीः याऽओ
षधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ॥ तासामसित्वमु
त्तमारङ्कामायशंहृदे ॥ ९२ ॥ याऽओषधीः ॥ याऽओषधीः
सोमराज्ञीर्विष्ठिताः पृथिवीमनु ॥ बृहस्पतिप्रसूताऽअ
स्यैसन्दत्तवीर्य्यम् ॥ ९३ ॥ याश्चेदं ॥ याश्चेदमुपशृण्वन्ति याश्च १२९

व ॥ ९६ ॥ साकंय्यक्ष्म ॥ साकंय्यक्ष्म प्रपत चाषेण किकि
दीविना ॥ साकंव्वातस्य ध्राज्या साकन्नश्य निहाकया
९७ ॥ अन्या वः ॥ अन्या वो अन्यामवत्वन्यान्यस्या उपा
वत ताः सर्व्वाः सँविदाना इदम्मे प्रावता वचः ॥ ९८ ॥ याः फ
लिनीः ॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पि
णीः ॥ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ ९९ ॥ मुञ्च
न्तु मा ॥ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ॥ अथो यमस्य

१२८ इष्कृतिर्न्नाम ॥ इष्कृतिर्न्नाम वो माता तायो यूयं स्थ निष्कृ
तीः ॥ सीराः पतत्रिणीस्थ नु यदामयति निष्कृथ ॥ ८३ ॥ अति वि
श्वाः ॥ अति विश्वाः परिष्ठास्तेन इव व्रजमक्रमुः ॥ ओष
धीः प्राचुच्यवुर्यत्किं च तन्वो रपः ॥ ८४ ॥ यदिमाः ॥ यदिमा वा
जयन्नहमोषधीर्हस्त आदधे ॥ आत्मा यक्ष्मस्य नश्यति
पुरा जीवगृभो यथा ॥ ८५ ॥ यस्यौषधीः ॥ यस्यौषधीः प्रसर्पथा
ङ्गमङ्गं परुष्परुः ॥ ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरि १२८

त्थेवोनिषदनम्पर्णेवोवसतिष्कृता॥ गोभाजऽइत्किलासथय
त्सनवथपूरुषम्॥७९॥ यत्रौषधीः॥ यत्रौषधीःसमग्मतराजा
नःसमिताविव॥ विप्रःसऽउच्यतेभिषग्रक्षोहामीवचात
नः॥८०॥ अश्वावतीꣳसोमावतीम्॥ अश्वावतीꣳसोमा
वतीमूर्जयन्तीमुदोजसम्॥ आवित्सिसर्वाऽओषधीरस्माऽअ
रिष्टतातये॥८१॥ उच्छुष्माः॥ उच्छुष्माऽओषधीनाङ्गावोगो
ष्ठादिवेरते॥ धनꣳसनिष्यन्तीनामात्मानन्तवपूरुष॥८२॥

१२७ ॐषधीः ॥ याऽॐषधीः पूर्वाजाता देवेभ्यस्त्रियुगम्पुरा ॥ मनै
नु बभ्रूणामहं शतन्धामानि सप्त च ७५ शतं वः ॥ शतं वो अ
म्ब धामानि सहस्रमुत वो रुहः ॥ अधा शतक्रत्वो यूयमिम
म्मेऽअगदङ्कृत ७६ ॐषधीः प्रति ॥ ॐषधीः प्रतिमोदध्वम्पु
ष्पवतीः प्रसूवरीः अश्वाऽइव सजित्वरीर्वीरुधः पारयिष्णवः
७७ ॐषधीरिति ॥ ॐषधीरिति मातरस्तद्वो देवीरुप ब्रुवे सनेय
मश्वङ्गां वासऽआत्मानन्तव पूरुष ७८ अश्वत्थे वः ॥ अश्व १२७

शेवथसोमपित्सेरु तच्चुप्यति गामविम्यपर्कस्वपावरीम्य

स्यावदूयवाहणम् ७१ कामञ्जमदुघे कामञ्जामदुघेधुक्ष

भित्रायवरुणायच इन्द्रायाश्विभ्याम्पूष्णे प्रजाभ्य उषधी

भ्यः ७२ विमुच्यध्वम् विमुच्यध्वमघ्या देवयानाः अगन्म

तमसस्पारमस्य ज्योतिरापाम ७३ सजूरब्दः सजूरब्दोः अ

यवोभिः सजूरुषाः अरुणीभिः सजोषसावश्विनदंसोभिः

सजूः सूर्य एतशेन सजूर्वैश्वानर इडया घृतेनस्वाहा ७४ या

१२९ बीजम् ॥ गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः
पक्वमेयात ॥ इन शुनꣳ सु ॥ शुनꣳ सुफाला वि कृषन्तु भू
मिꣳ शुनङ्कीनाशा अभि यन्तु वाहैः ॥ शुनासीरा हवि
षा तोशमाना सुपिप्पला ओषधीः कर्त्तनास्मे ॥ इन घृ
तेन सीता ॥ घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुम
ता मरुद्भिः ॥ ऊर्जस्वती पयसा पिन्वमाना स्मान्त्सीते पयसा
भ्याववृत्स्व ७० ॥ लाङ्गलं पवीरवत ॥ लाङ्गलं पवीरवत्सु १२६

वारस्यांविचृतस्य न॥ तत्तेविष्याम्म्यायुषोनमध्या दथैत

म्पितुमद्धिप्रसूतः॥ नमोभूत्यैयेदञ्चकार॥ द ५॥ निवेशनः

सङ्गमनः॥ निवेशनःसङ्गमनोवसूनांविश्वारूपाणि

वसूशचीभिः॥ देवऽइवसवितासत्यधर्म्मेन्द्रोनतस्थौस

मरेपथीनाम्॥ ६६॥ सीरायुञ्जन्ति सीरायुञ्जन्तिकवयो

युगाबितन्वतेपृथक्॥ धीरादेवेषुसुम्नया॥ ६७॥ युन्क

तसीरा॥ युनक्तसीराबियुगातनुध्वङ्कृतेयोनौवपतेह

१२५ स्मादिच्छु सातः कृत्वा नमो देवि निः श्रीं ते तुभ्यमस्तु ॥ ६२
नमः स्तु ॥ नमः स्तु ते निः श्रीं ते तिग्म तेजोयुक्तमयं ब्रिच्य
ताद्वुन्धमेतम् ॥ युमेन त्वं यं युम्मा सँ विद्रा नेतमे नाके
ऽ स्त्राधिरोह यै नमः ॥ ६३ ॥ यस्यास्ते ॥ यस्यास्ते घोरऽ स्त्रा
स जुह्लो म्येषाम्मन्धा नामव सर्जे नाय ॥ या त्वा जनो
भूमिरिति प्रमन्दते निः श्रीं ति त्वाहम्परि वेद विश्व
तः ॥ ६४ ॥ यन्ते ॥ यन्ते देवी निः श्रीं तिरा बबन्ध पाशङ्ग्रीवा १२५

मिहासदः॥ ५८॥ नवतन्नः॥ नवतन्नुःसमनसौस वै
तसावरेपसो॥ मायुज्ञथंहिंथ्वसिष्ठन्मायज्ञपतिञ्जात
वेदसौशिवौ न्नवतमुघनः॥ ६॥ मातेवपुत्रम्॥ मातेवपु
त्रम्पृथिवीपुराष्यमग्निंथ्वस्वेनावन्भाहृबा॥ तौंविश्वैर्देवै यो
वैऽर्ऋतुभिःसंविदानःप्रजापतिर्विश्वकर्मविमुञ्चे
तु॥ ६१॥ अस्सुन्वन्तमयजमानम्॥ अस्सुन्वन्तमयज
मानमिच्छस्तेनस्येत्यामन्विहितस्करस्य॥ अन्यम

१२४ मुद्ध्यचसङ्गिरः॥ रयीतमथ्र्य्य्यानाँवाजो नाथंसस्वति
प्यातिम॥ पद॥ समितम्॥ समितथ्र्य्यसङ्कल्पयाथसमिद्ध्रपी
रोचिष्णुसुमनस्यमानो॥ इषम्ऊर्जंमभिसंवसानो॥ ५७
संवाम॥ संवामनाथंसि संवृतासमुचित्तान्याकरम्
अग्नेत्वमसुरीष्याधिपा॥ भवन्त्वन्नः॥ इषमूर्जं॥ प्यजमा
नायधेहि॥ पन॥ अग्नेत्वम॥ अग्नेत्वमसुरीष्योरयि मासु
प्रीमौ॥ २१५ असि॥ शिवाः कृत्वादिशः सर्वाः स्वंयोनि १२४

न्नेग्नः। श्राग्रोहार्थ। नोवर्द्धयारयिम्॥५२॥ चिदसि॥ चिद

सितयादेवत यांगिरस्वध्रुवासीदपरिचिदसितयादेवत

यांगिरस्वध्रुवासीद॥५३॥ लोकम्पृण॥ लोकम्पृणच्छिद्रम्पृ

णाथोसीदध्रुवात्वम्॥ इन्द्राग्नीत्वाबृहस्पतिरस्मिन्यो

नावसीषदन्॥५४॥ ताः। अस्य॥ ताः। अस्यसूददोहसः सो

मश्रीणन्तिपृश्नयः॥ जन्मन्देवानांविशस्त्रिष्वारो

चनेदिवः॥५५॥ इन्द्रं विश्वाः॥ इन्द्रंविश्वाः। अवीवृधन्त्स

१२२ देवाँ२॥ऽ अचिषुघिष्ण्याये । यारोचनेपुरस्तात्सूर्य्यस्य या

श्चावस्ताद्दुपतिष्ठन्तऽ आपः ॥४८॥ पुरीष्यासोऽग्नयः

पुरीष्यासोऽ अग्नयः प्रावणेभिः सजोषसः ॥ जुषन्तांयज्ञ

मद्रुहोनमीवाऽइषोमहीः ॥५०॥ इडामग्ने ॥ इडामग्नेपुरु

दक्षसं सनिङ्गोः शश्वत्तमं हवमानायसाध ॥ स्यान्नः

सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥५१॥ अयन्ते

अयन्तेयोनिऽ ऋत्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन् १२२

ग्नेर्भस्मास्यग्नेः पुरीषमसि चितस्थपरि चित। ऊर्द्ध्व चि
तः श्रयध्वम् ॥४६॥ अयंसः ॥ अयं सो ऽग्निर्यस्मिंत्सो
ममिन्द्रः सुतं दधे जठरे वावशानः। सहस्रियं वाजमत्यं
न सप्तिं ससवान्त्संत्स्तूयसे जातवेदः ॥४७॥ अग्ने यत् ॥
अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ॥
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥
४८॥ अग्ने दिवः ॥ अग्ने दिवो ऽअर्णमच्छाजिगास्यच्छा

१३२ वन् ॥ युयोध्यस्मद्द्वेषांसि विश्वकर्म्मणे स्वाहा ॥ ४३ ॥
पुनस्त्वा ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धताम्पुनर्ब्र
ह्माणो वसुनीथ यज्ञैः ॥ घृतेन त्वन्तन्वं वर्द्धयस्व सत्याः स
न्तु यजमानस्य कामाः ॥ ४४ ॥ अपेत ॥ अपेत वीत वि च सर्प
तातो येऽत्र स्थ पुराणा ये च नूतनाः ॥ अदाद्यमोऽवसानम्पृ
थिव्या अक्रन्निमम्पितरो लोकमस्मै ॥ ४५ ॥ संज्ञानमसि
संज्ञानमसि कामधरणम्मयि ते कामधरणम्भूयात् ॥ अ ॥ १३२

तुर्य्यषोपस्येन्तरस्याद्ध्वशिवतमः॥४९॥ पुनरूर्ज्जा
पुनरूर्ज्जानिवर्त्तस्वपुनरग्नऽइषायुषा॥ पुनर्न्नःपाह्य
ᳫंहसः॥५०॥सहरय्या॥सहरय्यानिवर्त्तस्वाग्नेपिन्वस्व
धारया॥विश्वप्स्न्या विश्वतस्परि॥५१॥ बोधामे॥बोधा
मेऽअस्यवचसोयविष्ठमᳫंहिष्ठस्यप्रभृतस्यस्वधा
वः॥पीयतित्वोऽअनुत्वोगृणातिवन्दारुष्टेतन्वंवन्देऽअ
ग्ने॥५२॥सबोधि॥सबोधिसूरिर्म्मघवावसुपतेवसुदा

।२। प्स्वेनत॥३५॥अप्स्वग्ने॥अप्स्वग्नेसधिष्टवसौषधी
रनुरुध्यसे॥गर्भेसञ्जायसेपुनः॥३६॥गर्भोऽअसि॥ग
र्भोऽअस्योषधीनाङ्गर्भोवनस्पतीनाम्॥गर्भोविश्व
स्यभूतस्याग्नेगर्भोऽअपामसि॥३७॥प्रसद्यभस्मना
प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने॥सꣳसृ
ज्यमातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः॥३८॥पुनरा
सद्य पुनरासद्यसदनमपश्चपृथिवीमग्ने॥शेषेमा ।२।

त्वामारे रिहह्वयुधःसमन्नन्। सद्यो जज्ञानो विहि

मिद्धो अख्यदारोदसी भानुना भात्यन्तः॥३३॥ प्र

प्यायस्व॥ प्रप्यायमग्निर्भरतस्यशृण्वे वियत्सूर्यो न

रोचते बृहद्भाः॥ अभिर्यःपूरुंपृतनासुतस्थौ दीदा

यदैव्यो अतिथिः शिवो नः॥३४॥ आपो देवीः॥ आपो देवीः

प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्वंसुरभाउ लोके॥

तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रंबिभृता

१२० ह्वेमदेवाधत्तरयिमस्मेसुवीरम्॥२९॥ समिधाग्निम्
समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम्। आस्मिन्ह
व्याजुहोतन॥३०॥ उदुत्वा। उदुत्वाविश्वेदेवाऽअग्ने
भरन्तुचित्तिभिः। सनोभवशिवस्त्वंसुप्रतीकोविभा
वसुः॥३१॥ प्रेत। प्रेदग्नेज्योतिष्मान्याहिशिवेभिरर्चिभि
ष्ट्वम्। बृहद्भिर्भानुभिर्भासन्माहिंसीस्तन्वाप्रजाः
॥३२॥ अक्रन्ददग्निः। अक्रन्ददग्निस्तनयन्निवद्यौः। १२०

आतम्॥ आतम्जसौरस्यवसेवग्ग्नउक्कूऽउकूऽ
आनजशस्यमाने॥ प्रियः सूर्य्येप्रियोऽ अग्ग्नाभवा
तुज्जातेनाभिनदद्रुज्जानित्वैः॥२७॥ त्वामग्ग्ने॥ त्वा
मग्ग्नेयजमानाऽ अनुद्यून्विश्वावसुदधिरेवार्य्याणि॥
त्वयासहद्रविणमिच्छमानाव्रजङ्गोमन्तमुशिजोविव
व्रुः॥२८॥ अस्ताव्यग्ग्निः॥ अस्ताव्यग्ग्निर्न्नरांसुशेवोवै
श्वानरऽऋषिभिःसोमगोपाः॥ अद्वेषेद्यावापृथिवी

॥९ वकोऽअरतिः सुमेधामर्त्येष्वग्निरमृतोनिधायि॥ इ
यर्त्तिधूममरुषम्भरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्ष
न्॥२४॥ दृशानोरुक्मः॥ दृशानोरुक्मऽउर्व्याव्यद्यौ
द्दुर्मर्षमायुः श्रियेरुचानः॥ अग्निरमृतोऽअभवद्वयो
भिर्यदेनन्द्यौरजनयत्सुरेताः॥२५॥ यस्ते॥ यस्तेऽअद्य
कृणवद्भद्रशोचेऽपूपन्देवघृतवन्तमग्ने॥ प्रतन्नय
प्रतरंवस्योऽअच्छाभिसुम्नन्देवभक्तंयविष्ठ॥२६॥ ॥९

सद्योजज्ञानोव्विहीमिद्धोऽअख्यदारोदसीभानुना
भात्यन्तः॥२१॥श्रीणामुदारः॥श्रीणामुदारोधरुणोर
यीणाम्मनीषाणाम्प्रार्प्पणः सोमगोपाः॥वसुःसूनुःसह
सोऽअप्सुराजाविभात्यग्रेऽउषसामिधानः॥२२॥विश्वस्व
स्यकेतुः॥विश्वस्यकेतुर्भुवनस्यगर्भऽआरोदसी
ऽअपृणाज्जायमानः॥वीडुञ्चिदद्रिमभिनत्परायञ्ज
नायदग्निमयजन्तपञ्च॥२३॥उशिक्पावकः॥उशिक्पावको

११८ स्रमिन्धानऽ एन अरते स्वाधीः॥१८॥ विद्माते ऽ अग्ने त्रे
धा त्रयाणि विद्माते धाम बिभृता पुरुत्रा॥ विद्माते ना
म परमङ्गुहा यद्विद्मा तमुत्सँ यत ऽ आजगन्थ॥१९॥ समु
द्रेत्वा॥ समुद्रेत्वा नृमणा ऽ अप्स्वन्तर्नृचक्षा ऽ ईधे दिवो
ऽ अग्न ऽ ऊधन्॥ तृतीये त्वा रजसि तस्थिवांसमपामु
पस्थे महिषा ऽ अवर्द्धन्॥२०॥ अक्रन्ददग्निः॥ अक्रन्दद
ग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्। ११८

वयुनानि विद्वान्॥ मैनान्तपसा मार्च्चिषाभिशोचीरन्त
रस्याᳪं शुक्रज्योतिर्व्विभाहि॥ ४९॥ अन्तरग्ने॥ अन्तरग्ने
रुचा त्वमुखायाः सदने स्वे॥ तस्यास्त्वᳪं हरसा तपञ्जात
